श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चविंशः सर्गः ॥

## यज्ञैर्मेघनादस्य साफल्यं विभीषणेन रावणं प्रति परस्त्रीहरणदोषाणां वर्णनं कुम्भीनसीमाश्वास्य मधुना सह रावणस्य देवलोकोपर्याक्रमणम्

स तु दत्त्वा दशग्रीवो बलं घोरं खरस्य तत्।
भगिनीं स समाश्वास्य हृष्टः स्वस्थतरोऽभवत्॥ **7.25.1** ॥

ततो निकुम्भिला नाम लङ्कोपवनमुत्तमम्।
तद् राक्षसेन्द्रो बलवान् प्रविवेश सहानुगः॥ **7.25.2** ॥

ततो यूपशताकीर्णं सौम्यचैत्योपशोभितम्।
ददर्श विष्ठितं यज्ञं श्रिया सम्प्रज्वलन्निव॥ **7.25.3** ॥

ततः कृष्णाजिनधरं कमण्डलुशिखाध्वजम्।
ददर्श स्वसुतं तत्र मेघनादं भयावहम्॥ **7.25.4** ॥

तं समासाद्य लङ्केशः परिष्वज्याथ बाहुभिः।
अब्रवीत् किमिदं वत्स वर्तसे ब्रूहि तत्त्वतः॥ **7.25.5** ॥

उशना त्वब्रवीत् तत्र यज्ञसम्पत्समृद्धये।
रावणं राक्षसश्रेष्ठं द्विजश्रेष्ठो महातपाः॥ **7.25.6** ॥

अहमाख्यामि ते राजञ्श्रूयतां सर्वमेव तत्।
यज्ञास्ते सप्त पुत्रेण प्राप्तास्ते बहुविस्तराः॥ **7.25.7** ॥

अग्निष्टोमोऽश्वमेधश्च यज्ञो बहुसुवर्णकः।
राजसूयस्तथा यज्ञो गोमेधो वैष्णवस्तथा॥ **7.25.8** ॥

माहेश्वरे प्रवृत्ते तु यज्ञे पुम्भिः सुदुर्लभे।
वरांस्ते लब्धवान् पुत्रः साक्षात् पशुपतेरिह॥ **7.25.9** ॥

कामगं स्यन्दनं दिव्यमन्तरिक्षचरं ध्रुवम्।
मायां च तामसीं नाम यया सम्पद्यते तमः॥ **7.25.10** ॥

एतया किल सङ्ग्रामे मायया राक्षसेश्वर।
प्रयुक्तया गतिः शक्या नहि ज्ञातुं सुरासुरैः॥ **7.25.11** ॥

अक्षयाविषुधी बाणैश्चापं चापि सुदुर्जयम्।
अस्त्रं च बलवद् राजञ्छत्रुविध्वंसनं रणे॥ **7.25.12** ॥

एतान् सर्वान् वरान् लब्ध्वा पुत्रस्तेऽयं दशानन।
अद्य यज्ञसमाप्तौ च त्वां दिदृक्षन् स्थितो ह्यहम्॥ **7.25.13** ॥

ततोऽब्रवीद् दशग्रीवो न शोभनमिदं कृतम्।
पूजिताः शत्रवो यस्माद् द्रव्यैरिन्द्रपुरोगमाः॥ **7.25.14** ॥

एहीदानीं कृतं यद्धि सुकृतं तन्न संशयः।
आगच्छ सौम्य गच्छामः स्वमेव भवनं प्रति॥ **7.25.15** ॥

ततो गत्वा दशग्रीवः सपुत्रः सविभीषणः।
स्त्रियोऽवतारयामास सर्वास्ता बाष्पगद्गदाः॥ **7.25.16** ॥

लक्षिण्यो रत्नभूताश्च देवदानवरक्षसाम्।
तस्य तासु मतिं ज्ञात्वा धर्मात्मा वाक्यमब्रवीत्॥ **7.25.17** ॥

ईदृशैस्त्वं समाचारैर्यशोऽर्थकुलनाशनैः।
धर्षणं प्राणिनां ज्ञात्वा स्वमतेन विचेष्टसे॥ **7.25.18** ॥

ज्ञातींस्तान् धर्षयित्वेमास्त्वयाऽऽनीता वराङ्गनाः।
त्वामतिक्रम्य मधुना राजन् कुम्भीनसी हृता॥ **7.25.19** ॥

रावणस्त्वब्रवीद् वाक्यं नावगच्छामि किं त्विदम्।
कोऽयं यस्तु त्वयाऽऽख्यातो मधुरित्येव नामतः॥ **7.25.20** ॥

विभीषणस्तु सङ्क्रुद्धो भ्रातरं वाक्यमब्रवीत्।
श्रूयतामस्य पापस्य कर्मणः फलमागतम्॥ **7.25.21** ॥

मातामहस्य योऽस्माकं ज्येष्ठो भ्राता सुमालिनः।
माल्यवानिति विख्यातो वृद्धः प्राज्ञो निशाचरः॥ **7.25.22** ॥

पिता ज्येष्ठो जनन्या नो ह्यस्माकं चार्यकोऽभवत्।
तस्य कुम्भीनसी नाम दुहितुर्दुहिताभवत्॥ **7.25.23** ॥

मातृष्वसुरथास्माकं सा च कन्यानलोद्भवा।
भवत्यस्माकमेवैषा भ्रातृणां धर्मतः स्वसा॥ **7.25.24** ॥

सा हृता मधुना राजन् राक्षसेन बलीयसा।
यज्ञप्रवृत्ते पुत्रे तु मयि चान्तर्जलोषिते॥ **7.25.25** ॥

कुम्भकर्णो महाराज निद्रामनुभवत्यथ।
निहत्य राक्षसश्रेष्ठानमात्यानिह सम्मतान्॥ **7.25.26** ॥

धर्षयित्वा हृता सा तु गुप्ताप्यन्तःपुरे तव।
श्रुत्वापि तन्महाराज क्षान्तमेव हतो न सः॥ **7.25.27** ॥

यस्मादवश्यं दातव्या कन्या भर्त्रे हि भ्रातृभिः।
तदेतत् कर्मणो ह्यस्य फलं पापस्य दुर्मतेः॥ **7.25.28** ॥

अस्मिन्नेवाभिसम्प्राप्तं लोके विदितमस्तु ते।
विभीषणवचः श्रुत्वा राक्षसेन्द्रः स रावणः॥ **7.25.29** ॥

दौरात्म्येनात्मनोद्धूतस्तप्ताम्भा इव सागरः।
ततोऽब्रवीद् दशग्रीवः क्रुद्धः संरक्तलोचनः॥ **7.25.30** ॥

कल्प्यतां मे रथः शीघ्रं शूराः सज्जीभवन्तु नः।
भ्राता मे कुम्भकर्णश्च ये च मुख्या निशाचराः॥ **7.25.31** ॥

वाहनान्यधिरोहन्तु नानाप्रहरणायुधाः।
अद्य तं समरे हत्वा मधुं रावणनिर्भयम्॥ **7.25.32** ॥

सुरलोकं गमिष्यामि युद्धाकाङ्क्षी सुहृद्वृतः।
अक्षौहिणीसहस्राणि चत्वार्यग्र्याणि रक्षसाम्॥ **7.25.33** ॥

नानाप्रहरणान्याशु निर्ययुर्युद्धकाङ्क्षिणाम्।
इन्द्रजित् त्वग्रतः सैन्यात् सैनिकान् परिगृह्य च॥ **7.25.34** ॥

जगाम रावणो मध्ये कुम्भकर्णश्च पृष्ठतः।
विभीषणश्च धर्मात्मा लङ्कायां धर्ममाचरन्॥ **7.25.35** ॥

शेषाः सर्वे महाभागा ययुर्मधुपुरं प्रति।
खरैरुष्ट्रैर्हयैर्दीप्तैः शिशुमारैर्महोरगैः॥ **7.25.36** ॥

राक्षसाः प्रययुः सर्वे कृत्वाऽऽकाशं निरन्तरम्।
दैत्याश्च शतशस्तत्र कृतवैराश्च दैवतैः॥ **7.25.37** ॥

रावणं प्रेक्ष्य गच्छन्तमन्वगच्छन् हि पृष्ठतः।
स तु गत्वा मधुपुरं प्रविश्य च दशाननः॥ **7.25.38** ॥

न ददर्श मधुं तत्र भगिनीं तत्र दृष्टवान्।
सा च प्रह्वाञ्जलिर्भूत्वा शिरसा चरणौ गता॥ **7.25.39** ॥

तस्य राक्षसराजस्य त्रस्ता कुम्भीनसी तदा।
तां समुत्थापयामास न भेतव्यमिति ब्रुवन्॥ **7.25.40** ॥

रावणो राक्षसश्रेष्ठः किं चापि करवाणि ते।
साब्रवीद् यदि मे राजन् प्रसन्नस्त्वं महाभुज॥ **7.25.41** ॥

भर्तारं न ममेहाद्य हन्तुमर्हसि मानद।
नहीदृशं भयं किञ्चित् कुलस्त्रीणामिहोच्यते॥ **7.25.42** ॥

भयानामपि सर्वेषां वैधव्यं व्यसनं महत्।
सत्यवाग् भव राजेन्द्र मामवेक्षस्व याचतीम्॥ **7.25.43** ॥

त्वयाप्युक्तं महाराज न भेतव्यमिति स्वयम्।
रावणस्त्वब्रवीद्धृष्टः स्वसारं तत्र संस्थिताम्॥ **7.25.44** ॥

क्व चासौ तव भर्ता वै मम शीघ्रं निवेद्यताम्।
सह तेन गमिष्यामि सुरलोकं जयाय हि॥ **7.25.45** ॥

तव कारुण्यसौहार्दान्निवृत्तोऽस्मि मधोर्वधात्।
इत्युक्ता सा समुत्थाप्य प्रसुप्तं तं निशाचरम्॥ **7.25.46** ॥

अब्रवीत् सम्प्रहृष्टेव राक्षसी सा पतिं वचः।
एष प्राप्तो दशग्रीवो मम भ्राता महाबलः॥ **7.25.47** ॥

सुरलोकजयाकाङ्क्षी साहाय्ये त्वां वृणोति च।
तदस्य त्वं सहायार्थं सबन्धुर्गच्छ राक्षस॥ **7.25.48** ॥

स्निग्धस्य भजमानस्य युक्तमर्थाय कल्पितुम्।
तस्यास्तद् वचनं श्रुत्वा तथेत्याह मधुर्वचः॥ **7.25.49** ॥

ददर्श राक्षसश्रेष्ठं यथान्यायमुपेत्य सः।
पूजयामास धर्मेण रावणं राक्षसाधिपम्॥ **7.25.50** ॥

प्राप्य पूजां दशग्रीवो मधुवेश्मनि वीर्यवान्।
तत्र चैकां निशामुष्य गमनायोपचक्रमे॥ **7.25.51** ॥

**ततः कैलासमासाद्य शैलं वैश्रवणालयम्।**
**राक्षसेन्द्रो महेन्द्राभः सेनामुपनिवेशयत्॥ 7.25.52॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चविंशः सर्गः॥